# Shri Venkatesha Stotram

# શ્રીવેઙ્કટેશસ્તોત્રમ્

## Document Information

Text title : Shri Venkatesha Stotram 06 16

File name : venkaTeshastotram6.itx

Category : vishhnu, stotra, venkateshwara, vishnu

Location : doc_vishhnu

Proofread by : Gopalakrishnan

Description/comments : From stotrArNavaH 06-16

Latest update : September 18, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 3, 2023

*sanskritdocuments.org*

# શ્રીવેઙ્કટેશસ્તોત્રમ્

ક્ષેમં મે કમલાપતિર્વિતરતુ શ્રીવેઙ્કટાદ્રીશ્વરઃ
કારુણ્યામૃતવારિધિસ્ત્રિજગતાં ક્ષેમઙ્કરો વત્સલઃ ।
શ્રીમદ્ભાષ્યકૃતા સુબોધનિધિના રામાનુજસ્વામિના
ભક્ત્યા દત્તપરત્વચિહ્નવિલસદ્બાહુર્મહાવૈભવઃ ॥ ૧॥

રેખારૂપમનોજ્ઞદિવ્યકલશશ્રીપાઞ્જજન્યધ્વજ-
જ્ઞાનાબ્જાઙ્કુશકલ્પચકવિલસત્પાદારવિન્દદ્વયમ્ ।
લક્ષ્મીદિવ્યપદામ્બુજાતયુગળીજાજ્વલ્યમાનોલ્લસ-
લ્લાક્ષાલક્ષિતવક્ષસં સુશરણં શ્રીવેઙ્કટેશં ભજે ॥ ૨॥

સદ્યોજાતમનોજ્ઞપલ્લવલસત્પાણ્યમ્બુજાભ્યાં રમા
બિભ્રાણૌ સભયં તુ યસ્ય ચરણૌ સંવાહનેઽપિ ક્લમમ્ ।
શીઘ્રં કિઞ્ચ સરોરુહારુણતલૌ મઞ્જીરભૂષોજ્જ્વલૌ
તં દેવં શ્રિતપારિજાતમતુલં શ્રીવેઙ્કટેશં ભજે ॥ ૩॥

બ્રહ્મેશાદિકિરીટકોટિઘટિતપ્રત્યગ્રનાનાવિધ-
શ્રીમદ્રત્નમહઃપ્રરોહનિકરૈર્નીરાજિતશ્રીપદમ્ ।
આનન્દાખ્યવિમાનદિવ્યનિલયે લક્ષ્મ્યા સહ ક્રીડિતં
સાક્ષાન્મન્મથમન્મથં ગુણનિધિં શ્રીવેઙ્કટેશં ભજે ॥ ૪॥

શ્રીપાદૌ ચરણાગતૈઃ પ્રથમતો યસ્યાવગાહ્યૌ જનૈઃ
દેદીપ્રાવમૃતાયિતાવિવ શિશોર્માતુઃ સ્તનૌ શ્રીપતેઃ ।
ગોત્રાયાં વિપિને વૃષાદ્રિશિખરે ચિત્તેઽપ્યનન્યાત્મનાં
વેદાન્તે સમમાહિતૌ તમતુલં શ્રીવેઙ્કટેશં ભજે ॥ ૫॥

અત્યન્તપ્રિયદર્શનં કમલયા પ્રારુઢવક્ષઃસ્થલં
નાનાભૂષણભૂષિતં પ્રવિલસત્પીતામ્બરપ્રોજ્જ્વલમ્ ।
સર્વાભીષ્ટવરપ્રદં પ્રણમતાં જાજ્વલ્યમાનપ્રભં
બાલાર્કોજ્જ્વલદિવ્યરત્નમકુટં શ્રોવેઙ્કટેશં ભજે ॥ ૬॥

અમ્ભોજામૃતસિન્ધુજાતકલશપ્રસ્પર્ધિદિવ્યાનનં
સુભ્રૂસુન્દરમધ્યચન્દ્રવિલસત્ભાલં મનોજ્ઞસ્મિતમ્ ।
આકર્ણાયતલોચનં મણિમયશ્રીહારભૂષોજ્જ્વલં
શ્રીવત્સાઙ્કિતવક્ષસં શ્રિતનિધિ શ્રીવેઙ્કટેશં ભજે ॥ ૭॥

સર્વજ્ઞં કલિકલ્મષઘ્નમમલં લક્ષ્મીનિવાસોરસં
શક્તં સન્નતવત્સલં વિધિમુખૈર્દેવૈઃ સદા વન્દિતમ્ ।
સંસારાર્ણવતારકાઙ્ઘ્રિયુગળં કન્દર્પકોટિપ્રભં
ષાડ્ગુણ્યાત્મકદિવ્યમઙ્ગલતનું શ્રીવેઙ્કટેશં ભજે ॥ ૮॥

અન્ધઃ પશ્યતિ દુઃખિનસ્તુ સુખિનો મૂકઃ પ્રવક્તિ સ્ફુટમ્ ।
પઙ્ગુર્ધાવતિ વેગતસ્તુ લભતે વન્ધ્યા ચ ભવ્યં મુતમ્ ।
આર્તાશ્ચાપિ નિરામયાસ્તુ બધિરાઃ શ‍ૃણ્વન્તિ સમ્યક્ તતો
યસ્યાનુગ્રહવૈભવેન વિમલં શ્રીવેઙ્કટેશં ભજે ॥ ૯॥

ભક્તાભીષ્ટદભાષ્યકારગુરુણા દત્તાબ્જચક્રોજ્જ્વલ
દ્વાહું ભક્તજનાનુભાવ્યમનિશં નીલામ્બુદશ્યામલમ્ ।
સર્વાધીશ્વરતા પ્રકાશકલસન્મુક્તાકિરીટોજ્જ્વલં
રાકાચન્દ્રમુખં દયાગુણનિધિં શ્રીવેઙ્કટેશં ભજે ॥ ૧૦॥

લક્ષ્મીગેહભુજાન્તરં કલિયુગપ્રત્યક્ષનારાયણં
સત્યાનન્દચિદાત્મકં પરિનુતં પશ્ચાનનાદ્યૈર્બુધૈઃ ।
શ્રીશેષાચલશ‍ૃઙ્ગમઙ્ગલમહાભૂષાયિતશ્રીપદં
સર્વેષાં જગતામભીષ્ટવરદં શ્રીવેઙ્કટેશં ભજે ॥ ૧૧॥

સર્વેષાં સુહૃદં સુશીલમનઘં શ્રીમઙ્ગલાશાસનં
કુર્વદ્ભિઃ પરિશુદ્ધમાનસયુતૈઃ શ્રીવૈષ્ણવૈઃ સંવૃતમ્ ।
બિમ્બાભાધરમુદ્યદિન્દુવદનં કર્ણાન્તલોલેક્ષણં
શ્રીમદ્દિવ્યલલાટપટ્ટતિલકં શ્રીવેઙ્કટેશં ભજે ॥ ૧૨॥

કૌશેયપુષ્પિતકટીતટમમ્બુજાક્ષં
કાન્તાકુચામ્બુરુહકુડ્મલલોલદૃષ્ટિમ્ ।
કન્દર્પદર્પહરસુન્દરદિવ્યમૂર્તિં
શ્રીવેઙ્કટેશમગતિઃ શરણં પ્રપદ્યે ॥ ૧૩॥

આપાદમૌલિમભિજાતમનોહરાઙ્ગ-

માદિત્યકોટિકિરણોજ્જ્વલહેતિરાજમ્ ।
આતામ્રદિવ્યમધુરાધરપલ્લવં ચ
શ્રીવેઙ્કટેશમગતિઃ શરણં પ્રપદ્યે ॥ ૧૪॥

દિવ્યૈર્દન્તિકરોપમૈર્મૃદુતરૈઃ સુસ્નિગ્ધવર્ણૈઃ શુભૈઃ
નાનાભૂષણભૂષિતૈઃ શુભનખૈઃ કલ્યાણરેખાઞ્ચિતૈઃ ।
વૃત્તૈર્જ્યાકિણકર્કશૈરભયદૈઃ પીનૈશ્ચતુર્ભિઃ સતાં
શ્રીમદ્ભાહુભિરાયતૈર્વિલસિતં શ્રીવેઙ્કટેશં ભજે ॥ ૧૫॥

દાતારં કિલ સમ્પદાં ત્વચરણદ્વન્દ્વાશ્રિતાનાં સતાં
દૈત્યાનાં તુ નિઘાતિનં ત્રિજગતાં નાથં મહાવત્સલમ્ ।
સિંહસ્કન્ધમનેકરત્નરચિતશ્રીહારવક્ષઃસ્થલં
શ્રીમત્પુણ્ડ્રલલલ્લલાટફલકં શ્રીવેઙ્કટેશં ભજે ॥ ૧૬॥

લક્ષ્મીનિવાસ નિખિલાશ્રિતલોકબન્ધો
વૈકુણ્ઠનાથ નિરવદ્યગુણૈકસિન્ધો ।
શ્રીવેઙ્કટેશ ભુવિ વિશ્રુતદિવ્યકીર્તે
પાહિ પ્રપન્નગગતિં શરણાગતં મામ્ ॥ ૧૭॥

વરગુણમણિસિન્ધુર્વત્સલઃ શ્રીનિવાસઃ
કલશજલધિકન્યાપ્રાણનાથો દયાલુઃ ।
મણિવરમણિભૂષા વત્સજાજ્વલ્યમાનો
(મણિવરમાણિઃ - કૌસ્તુભમણિ, વત્સઃ - શ્રીવત્સઃ)
વિતરતુ મમ સૌખ્યં વેઙ્કટેશો મુકુન્દઃ ॥ ૧૮॥

કનકમયકિરીટો દિવ્યલાવણ્યસિન્ધુઃ
પ્રણતવરદબન્ધુઃ પદ્મપત્રાયતાક્ષઃ ।
સુલભચરણયુગ્મઃ સ્વાશ્રિતાનાં કૃપાલુઃ
વિતરતુ મમ સૌખ્યં વેઙ્કટેશો મુકુન્દઃ ॥ ૧૯॥

મરતકગિરિમૂર્તિમઙ્ગલાનાં નિવાસઃ
સ્ફટિકમકુટમૂર્ધા પીતકૌશેયવાસઃ ।
કનકવલયભૂષાપ્રોજ્જ્વલદ્દિવ્યબાહુઃ
વિતરતુ મમ સૌખ્યં વેઙ્કટેશો મુકુન્દઃ ॥ ૨૦॥

સરસિજમુખપાણિઃ સર્વલોકૈકનાથઃ
વિકચકમલનેત્રઃ શ્યામલઃ કોમલાઙ્ગઃ ।

જલજચરણયુગ્મઃ શ્રીનિવાસો દયાલુઃ
    વિતરતુ મમ સૌખ્યં વેઙ્કટેશો મુકુન્દઃ ॥ ૨૧॥

વિધિવિબુધનિયન્તા વિશ્વભક્તાર્તિરહન્તા
    વિનતવિવિધજાતિક્ષેમકલ્યણમન્તા ।
વિમલમધુરમન્દસ્મેરદિવ્યાનનાબ્જો
    વિતરતુ મમ સૌખ્યં વેઙ્કટેશો મુકુન્દઃ ॥ ૨૨॥

અત્યર્કાનલદીપ્તમુત્તમપદં વૈકુણ્ઠમત્યદ્ભુતં
    ત્યક્ત્વાનુગ્રહકામ્યયા પ્રણમતાં લક્ષ્મ્યા સહ ક્રીડિતઃ ।
શ્રીમદ્વેઙ્કટ ભૂધરે મણિગણૈર્નાનાવિધૈર્ધાતુભિ-
    ર્દેદીપ્રે ભગવાન્ સમાસ્તુ ગુણવાન્ ક્ષેમકરઃ સર્વદા ॥ ૨૩॥

ભક્તાનાં દોષભોગ્યઃ પ્રવરગુણનિધિર્મઙ્ગલાનાં નિવાસઃ
    વિખ્યાતઃ સર્વધાતા સરસિજનયનો વેદવેદાન્તવેદ્યઃ ।
શેષાદ્રૌ શેષતલ્પે જલધિતનયયા સાર્ધમિન્દીરાક્ષ્યા
    ક્રીડન્ દેવાધિરાજો મમ તુ વિતરતાન્મઙ્ગલં શ્રીનિવાસઃ ॥ ૨૪॥

વિધિશિવવિબુધૈન્દ્રપ્રાણિરક્ષૈકદીક્ષો
    વિવિધકલિનિહન્તા વત્સલઃ સ્વાશ્રિતેષુ ।
શ્રુતહૃદયનિવાસઃ શીલવાન્ પઙ્કજાક્ષો
    વિલસતુ મમ ચિત્તે વેઙ્કટેશો મુકુન્દઃ ॥ ૨૫॥

મરતકમણિરત્નસ્ફાટિકચ્છન્નદિવ્ય-
    પ્રવરકનકભૂષાભૂષિતઃ સંશ્રિતાર્થમ્ ।
નયનસુભગદિવ્યશ્યામકલ્યાણગાત્રો
    વિલસતુ મમ ચિત્તે વેઙ્કટેશો મુકુન્દઃ ॥ ૨૬॥

વરદ નિખિલબન્ધો ક્ષાન્તિસૌશીલ્યસિન્ધો
    કમલનયન વિષ્ણો શઙ્ખચક્રાસિપાણે ।
દિવિ ભુવિ મમ બન્ધો શ્રીપતે વેઙ્કટેશ
    શ્રિતજનશુભકલ્પ શ્રીનિધે ત્રાહિ દાસમ્ ॥ ૨૭॥

દિવિ ભુવિ મમ સૌખ્યં સમ્પ્રયચ્છ પ્રયચ્છ
    શ્રુતિશિરસિ વિદીપ્ત શ્રીનિધે વેઙ્કટેશ ।
ચલમતિમવિનીતં માં ચ કન્દર્પવશ્યં
    તવ કિલ દયનીયં પાહિ પાહિ પ્રસીદ ॥ ૨૮॥

કલૌ લોકનાથ પ્રશસ્ત પ્રશસ્ત
  પ્રિયં વેઙ્કટેશ પ્રયચ્છ પ્રયચ્છ ।
હરે દીનબન્ધો પ્રસીદ પ્રસીદ
  સદા વેઙ્કટેશં સ્મરામિ સ્મરામિ ॥ ૨૯॥

સ્વામિપુષ્કરિણીતીરે શ્રીમદ્વેઙ્કટભૂધરે ।
વસતે રમયા સાર્ધં વેઙ્કટેશાય મઙ્ગલમ્ ॥ ૩૦॥

ઇતિ શ્રીવેઙ્કટેશસ્તોત્રં સમ્પૂર્ણમ્ ।

Proofread by Gopalakrishnan

*Shri Venkatesha Stotram*

pdf was typeset on February 3, 2023

Please send corrections to *sanskrit@cheerful.com*